[टिप्पनकरूपा व्याख्या]

पुनः प्रक्ष(भ्रक्ष्य)ते । यदि द्रव्यं हारितं भवति तदा जित्वा पुनः प्राप्यते । परं पथिक ! प्रियस्य विरक्तं चित्तं कथं व्यावर्त्यति(°र्त्तते) ॥ १०१ ॥

[१०२] हे सुन्दरि ! स्थिरा भव । मनो मार्गे धर । लोचनाभ्यां वहन्नीरं संवर । प्रवासिनो बहुकर्मणि गच्छन्ति भ्रमन्ति च । मत्कृ(अकृ)ते प्रयोजने न व्याघुटन्ति ॥ १०२ ॥

[१०३] ते च विदेशे भ्रमन्तः, मन्मथशरप्रहता निजगृहिणी[ः] स्मरन्तः, विरहेण वसी(शी)कृताः, दिवसरात्रौ निजदय(यि)ताशोकभरमसहन्तः, यथा यूयं तथा नितरां पथिका अपि क्षीयन्ते – दुर्बला भवन्ति ॥ १०३ ॥

[अवचूरिका]

(रुक्षं) भवति तदा तैल्येनाभ्यङ्ग्यते – मर्द्यते, अथ द्रविणं हार्यते पुनरपि जित्वा भिद्यते – प्राप्यते । हे पथिक ! प्रियस्य विरक्तं हृदयं कथं व्यावर्त्तते ॥

[१०२] पथिको भणति – हे सुप्रताक्षि ! मनो धीरय, मार्गे धर, लोचनाभ्यां वहन्नीरं नितरां संवर । पथिका बहुकार्ये गच्छन्ति, तत्र परिभ्रमन्ति । अकृते निजप्रयोजने हे सुन्दरि ! न वलन्ति – न व्याघुट्यन्ति ॥

[१०३] ते च विदेशं भ्रमन्तो मन्मथशरप्रहता निजगृहिणीः स्मरन्तो विरहेण वशीकृताः, दिवसरात्रौ निजदयिताशोकभरमसहन्तः, यथा यूयं तथा नितरां पथिका अपि क्षीयन्ते – दुर्बला भवन्ति ॥

एय[1] वयण आयन्निवि दीहरलोयणिहिं[2],
पढिय[3] अडिल्ल[4] वियसेविणु मयणुक्कोयणिहिं । [अर्द्धम् ।]

*

जइ मइ णत्थि[5] णेहु ताकं तहं,
पंथिय[6] कज्जु साहि मह कंतहं ।
जं[7] विरहग्गि मज्झ [8]णक्कंतह,
हियउ हवेइ मज्झ [9]णक्कंतह ॥ १०४ ॥ [अडिल्लच्छन्दः ।]

1 C पहिय । 2 A °लोयणिहि । 3 A पढि अडि° । 4 C अडिल । 5 A णेहु णत्थि । 6 A पंथि कज । 7 A जइ । 8 B णह कंतह । 9 B मज्झु णहु; A C णकंतह ।

[टिप्पनकरूपा व्याख्या]

[१०४] एतद् वचनमाकर्ण्य दीर्घतराक्षा(क्ष्या) मदनोत्कौकुच्यया अडिल्ला पठिता ।

संदेह(श)रासकोऽयमिति ग्रन्थभावं सूचयन्नाह – यदि कान्तस्य मयि स्नेहो नास्ति, तथापि मम कान्ताय, कार्यं – संदेशकं साधय – कथय । यद् विरहाग्निर्मम कान्तस्य, अन्यच्च मम हृदयं ज्वालयति, न कान्तस्य – एकोऽर्थः ।

यदि तस्य स्नेहं (°हो) मयि नास्ति, इत्यहं 'ताकं' देशीत्वात् तर्कयामि । तथापि पथिक ! मम कान्ताय कार्यं – संदेशकं साधय – कथय । प्राकृतत्वात् षष्ठीस्थाने चतुर्थी। यद् विरहाग्निर्मम मध्यम्, आनक्रान्तं – नासिकान्तं यावत्, नक्रा(क्ता)न्तं – अहर्दिवसं रात्रिप्रान्तं हृदयं ज्वालयति – द्वितीयोऽर्थः ॥ १०४ ॥

अडिल्लच्छन्दः । लक्षणं यथा –

चउपइ इक्कु जमक्कु जि दीसइ, अडिलछंदु सु बुहहि सलीसइ ॥

अडिल्लच्छन्दोलक्षणम् – चतुःपदेषु एक सदृक्षो ज(य)मको भवति । स विबुधैः अडिल्लच्छन्दः कथ्यते ॥

[अवचूरिका]

[१०४] एतद्वचनमाकर्ण्य दीर्घतराख्या(क्ष्या) मदनोत्कौकुच्यया, अडिल्ला पठिता ।

संदेशरासकोऽयमिति ग्रन्थभावं सूचयति – यदि कान्तस्य मयि स्नेहो नास्ति, इत्यहं 'ताकं' देशीत्वात् – तर्कयामि, तथापि पथिक ! मम कान्ताय, कार्यं – संदेशकं साधय – कथय । प्राकृतत्वात् षष्ठीस्थाने चतुर्थी ॥

द्वितीयपक्षे – यद्विरहाग्निर्मम मध्यम्, आनक्रान्तं – नासिकां यावत्, नक्तान्तं – अहोदिवसं रात्रिप्रान्तम्, हृदयं ज्वालयति – द्वितीयोऽर्थः ॥

कहि ण सवित्थरु[1] सक्कउ[2] मयणाउहवहिय,
इय[3] अवत्थ अम्हारिय[4] [5]कंतह सिव[6] कहिय ।
अंगभंगि णिरु अणरइ[7] उज्जगउ[8] णिसिहि,
विहलंघल गय मग्ग चलंतिहि[9] आलसिहि[10] ॥ १०५ ॥

धम्मिलह संवरणु न घणु कुसमिहि रइउ,
कज्जलु[11] गलइ कवोलिहि जं नयणिहि[12] धरिउ[13] ।
जं पियआसासंगिहि अंगिहिं[14] पलु चडइ[15],
विरह[16] हुयासि[17] झलक्किउ[18] तं पडिलिउ झडइ ॥ १०६ ॥

आसाजलसंसित्त विरहउन्हत्त जलंतिय[19],
णहु[20] जीवउ[21] णहु मरउ पहिय ! अच्छउ धुक्खंतिय[22] ।

---

1 C सवित्थतु । 2 C मणायउह° । 3 B नास्ति 'इय'; C हुअ । 4 A अम्हारीय । 5 B पहिय कंतह । 6 B सह; C सउ । 7 C अणरउ; B अरुणउ । 8 B उयग्गउ । 9 B C चलंतह । 10 C आलिसिहि । 11 C कज्जल । 12 C नयणि । 13 B धरियउ । 14 A अंगि प° । 15 B चडइं । 16 A विरहु । 17 A हुयास; B हुयासु । 18 C झलक्कि पडिल्लउ तं; B तं पडलिउ झलइ । 19 A जलंतीय; C जलंती । 20 A नहु । 21 B जीयउ । 22 C धुकंती ।

[टिप्पनकरूपा व्याख्या]

[१०५] भो पथिक ! संदेशको विस्तरः । मदनस(श)रव्याप्तया मया कथि(थयि)तुं न शक्यते । परं भो पथिक ! मदीयाऽवस्था प्रियतमस्याग्रे सर्वा कथनीया । अहर्निशं मे–मम अङ्गे अरतिर्वर्त्तते । तव विरहे मार्गे चलन्त्या विह्वलङ्गला भवामि ॥ १०५ ॥

[१०६] धर्मिल(म्मिल्ल)स्य संवरणं कुसुमैर्न रचितम् । नेत्रयोर्धृतं कज्जलं कपोलमार्गे गलति । यत् प्रियागमास(श)या पलं–मांसं देहे चटति, तद्विरहाग्निना झलकितं–भस्मीकृतं द्विगुणं झटति ॥ १०६ ॥

[१०७] आसा(शा)जलेन संस(सि)क्ता विरहाग्निना ज्वलन्ती च न जीवामि,

[अवचूरिका]

[१०५] हे पथिक ! अहं मदनायुधबाधिता संदेशकं सविस्तरं कथि(थयि)तुं न शक्नोमि, परमिमामवस्थां सकलां कान्ताय कथय । तामाह–अङ्गे भङ्गः, नितरामरतिः, निशि जागरः, विह्वलङ्गला गतिर्मार्गे चलन्त्या आलस्येन ॥

[१०६] धम्मिल्लस्य संवरणं कुसुमैर्न रचितम्, नेत्रयोर्धृतं कज्जलं कपोलमार्गे गलति, यत्प्रियागमास(श)या पलं–मांसं देहे चटति, तद्विरहाग्निना झलकितं–भस्मीकृतं द्विगुणं झटति ॥

इत्थंतरि पुण पुणवि[1] तेणि[2] पहिय [3]धरेवि मणु,
फुल्लउ[4] भणियउ[5] दीहरच्छि[6] णियणयण फुसेविणु ॥ १०७ ॥

*

सुन्नारह जिम मह हियउ, पिय[7] उक्किंख करेइ[8] ।
विरहहुयासि दहेवि करि, आसाजलि सिंचेइ[9] ॥ १०८ ॥

*

पहिउ[10] भणइ पहि जंत अमंगलु[11] मह[12] म करि[13],
रुयवि[14] रुयवि पुणरुत्त[15] वाह संवरिवि धरि ।
पहिय ! होउ तुह[16] इच्छ[17] अज्ज सिज्झउ गमणु,
मइ न रुन्नु विरहग्गिधूम लोयणसवणु ॥ १०९ ॥

---

1 A C पुणरवि पहिय । 2 A C नास्ति 'तेणि' । 3 A धारवि; C धरेविणु । 4 A फुलउ । 5 A C भणिउ । 6 A दीहअच्छि; B दीहच्छि । 7 C पय । 8 A उक्किंषि करेइ; C उक्किंखरेइ । 9 A संचेइ । 10 C पहिय । 11 C अमंगल । 12 C महु । 13 B करहि । 14 C रुइवि । 15 C पुणरत्त । 16 A तुय । 17 B इच्छिउ ।

[टिप्पनकरूपा व्याख्या]

न मृ(म्रि)यते; धुक्खंती अग्निरिव तिष्ठामि । अत्रान्तरे, पथिकं मनो धृत्वा, पुनः पुनरपि नेत्रे स्पृष्ट्वा, फुल्लको भणितः ॥ १०७ ॥

[१०८] हे प्रिय ! मम हृदयं स्वर्णकारवद् वर्त्तते । यथा स्वर्णकारः प्रियोत्कण्ठया – अभीष्टलाभेच्छया स्वर्णमग्निना दग्ध्वा, जल(ले)न सिञ्चति, तथा शरीरस्वर्णं प्रियविरहस्मरणेनाग्निना दग्धम्, पुनः सङ्गमाशाजलेन सिञ्चितम् ॥ १०८ ॥

[१०९] पथिको भणति – व्रजतः पथि ममामङ्गलं मा कुरु, रुदित्वा रुदित्वा । पुनरश्रूणि संवर । सा प्राह – पथिक ! तवेप्सितं भवतु । अद्य गमनं सिद्ध्यतु । मया न रुदितम् । विरहाग्नेर्धूमाधिक्यवाल्लोचनश्र(स्र)वणं जातम् ॥ १०९ ॥

[अवचूरिका]

[१०७] आशाजलेन सिक्ता विरहाग्निना ज्वलन्ती न च जीवामि, नो मरामि, किन्त्वग्निरिव धुखन्ती तिष्ठामि । अत्रान्तरे मनो धीरयित्वा, नेत्रे स्पृष्ट्वा, पु(फु)लको भणितः ॥

[१०८] हे प्रिय ! मम हृदयं स्वर्णकारवद् वर्त्तते । यथा स्वर्णकारः प्रियोत्कण्ठया – अभीष्टलाभेच्छया स्वर्णमग्निना दग्ध्वा जलेन सिञ्चति, तथा शरीरस्वर्णं प्रियविरहाग्निना दग्ध्वा पुनः सङ्गमाशाजलेन सिञ्चति ॥

[१०९] पथिको भणति – पथि व्रजतो म[म] माऽमङ्गलं कुरु । रुदित्वा पुनरश्रूणि संवर । सा प्राह – तवेप्सितं भवतु । अद्य गमनं प्रसिध्यतु । मया नो रुदितम् । विरहाग्नेर्धूमाधिक्यवाल्लोचनात् स्रवणं जातम् ॥

पहिउ भणइ पसयच्छि[1] ! तुरियउ किं वज्जरहि,
रवि [2]दिणसेसि[3] पहुत्तु पडुंजहि[4] दय करहि ।
जाहि[5] पहिय ! तुह[6] मंगलु[7] होउ[8] पुणन्नवउ,
पियह कहिय हिव[9] इक्क [10]मडिल अन्नु[11] चूडिलउ ॥ ११० ॥

तणु[12] दीउन्हसासि सोसिज्जइ[13],
अंसुजलोहु णेय सो सिज्जइ ।
हियउ पउक्कु[14] पडिउ दीवंतरि,
णाइ पतंगु पडिउ[15] दीवंतरि ॥ १११ ॥

1 A पसच्छि; B पसियच्छि । 2 B दिणि° । 3 C °सेस । 4 C पडुज्जय । 5 C जहि । 6 A तुय; B तुव । 7 C मंगल । 8 C हो । 9 A नास्ति 'हिव' । 10 A इक अडिल्ल । 11 B C अनु; A अन्नु तह । 12 C तिणु । 13 B °सिज्जइं । 14 C पडिक्कु । 15 A B **'पडिउ पियंगु णाइ दीवंतरि'** एतादृशः पाठः ।

[टिप्पनकरूपा व्याख्या]

[११०] **पथिको भणति – हे प्रसृतिप्रमाणलोचने ! तु(त्व)रितं कथय, किं संदेशकं दास्यसि । रविः – सूर्यः, अस्तं आयातः । ममोपरि दयां कृत्वा प्रेषय । सा आर्सी (°शिषं)दत्त्वा कथयति – जा(या)हि त्वम् । तव पुनः पुनर्नवो मङ्गलो भवतु । मम प्रियस्याग्रे एकं अ(म)डिल्लं अन्यत् चूडिलकं कथनीयम् ॥ ११० ॥**

[१११] **तनु दीर्घोष्णु(ष्ण)श्वासैः सोख्य(शुष्य)ते, अश्रुजलौघस्तु तस्मादुत्पन्नोऽपि न च सो(शु)ष्यते – इति महदाश्चर्यम् । मम हृदयं द्वीपान्तरे पतितं – शून्यं जातमित्यर्थः । मन्ये पतङ्गो द्वी(दी)पमध्ये पतितः, सोऽपि मृ(म्रि)यते ॥ १११ ॥**

मडिल्लच्छन्दः । तल्लक्षणम् –

"जमक्कु होइ जहि बिहु पय जुत्तउ । मडिल्लछंदु तं अज्जुणि वुत्तउ ॥"

[अवचूरिका]

[११०] **पथिको भणति – हे प्रसृताक्षि ! त्वरितं किञ्चिद् वद । रविर्दिनशेषं प्राप्तः । दयां कृत्वा मां विसर्जय । सा प्राह – हे पथिक ! व्रज, तव पुनर्णवं माङ्गल्यं भवतु । प्रियायैकां अ(म)डिल्लां अन्यत् चूडिलकं च वदेः ॥**

[१११] **तनु दीर्घोष्णश्वासैः सोख्य(शुष्य)ते । अश्रु(अश्रु)जलौघस्तु तस्मादुत्पन्नोऽपि न च शुष्यत इति नादाश्चं (? महदाश्चर्यम्) । मम हृदयं द्वीपान्तरे पतितं – शून्यं जातमित्यर्थः । मन्ये पतङ्गो दीपमध्ये पतितः । सोऽपि म्रियते ॥**

उत्तरायणि [1]वड्ढिहि दिवस,
णिसि दक्खिण[2] इहु[3] पुव्व[4] णिउइउ[5] ।
दुच्चिय वड्ढहि[6] जत्थ पिय,
इहु तीयउ विरहायणु[8] होइयउ ॥ ११२ ॥

*

गयउ दिवसु थिउ सेसु पहिय ! गमु[9] मिल्हियइ,
णिसि अत्थमु[10] बोलेवि दिवसि[11] पुणु[12] चल्लियइ ।
बिंबाहरि[13] दिण[14] बिंब[15] जुन्ह[16] गोसिहि[17] बलइ[18],
तो [19]जाइअइ अ कज्जि मइ[20] अइआवलइ*,
जइ न रहहि इणि ठाइ[21] पहिय ! इच्छहि गमणु[22],
चूडिल्लउ खडहडउ पियह गाहाइ[23] भणु ॥ ११३ ॥

*

1 C बढहि । 2 C दक्षिण; B दक्षण । 3 C इय । 4 C पुव्वि । 5 C निउयउ । 6 A वत्थहि । 7 A लीयउ । 8 A विरहाइणु; C तुअ विरहायण । 9 C गम । 10 C अत्थिमु । 11 C दिविसि । 12 C पुणि । 13 B बिंबाहर । 14 B C दिणि । 15 C बिंबु । 16 C जुनु । 17 B गोसहिं । 18 C चलइ । 19 A जायइ अकज्जि । 20 B ममइ; A मइ अ । * C आदर्शे एषः पादः **'रइणि तो जाइ हउ कज्जिहिं आवलउ'** एतादृशो लभ्यते । 21 B C ठाइं । 22 B गवणु । 23 A गाइं भमणु ।

[टिप्पनकरूपा व्याख्या]

[११२] **सर्वकालस(स्य) दुःखतामाह–उत्तरायणे दिवसा वर्द्धन्ते रात्रयो ह्रीयन्ते, दक्षिणायने रात्रयो वर्द्धन्ते दिवसा ह्रीयन्ते । यत्र द्वे वर्धेते तन्मन्ये एषः त्रि(तृ)तीय[:] विरहायनो जातः । द्वयोर्हानौ तुर्यः सुखायनः, चकारात् ॥ ११२ ॥**

चोडियालकच्छन्दः । तल्लक्षणम्–

"दोहाछंदु जि दु दलु पढि मत्त ठविज्जहिं पंच सु केहा ।
चूडिल्लउ तं वुह मुणहु गुल्हु पयंपइ सच्चु सु एहा ॥"

दोधकच्छन्दसं पठित्वा प्रान्ते प्रान्ते पञ्च पञ्च मात्रा न्यस्यन्ते । चोडियालको भवति ॥

[११३] **दिवसो गतः, स्थितः शेखः(षः) । हे पथिक ! गमनं मुच्यताम् । निशां**

[अवचूरिका]

[११२] उत्तरायणे दिवसा वर्धन्ते, रात्रयो ह्रीयन्ते; दक्षिणायने रात्रयो वर्धन्ते न दिवसाः । यत्र द्वे वर्धेते तन्मन्ये–एषस्तृतीयो विरहायनो जातः । द्वयोर्हानौ तुर्यः सुखायनश्चकारात् ॥

[११३] हे पथिक ! दिवसो गतः–स्थितशेषो जातः । गमनं मुच्यताम् । निश्यस्तमनं

फलु[1] विरहग्गि पवासि तुअ[2],
पाइउ अम्हिहि[3] जाइ पियह भणु ।
चिरु[4] जीवं तउ लद्धु वरु,
हुअउ संवच्छरतुल्लउ[5] इक्कु दिणु ॥ ११४ ॥

*

जइ पिम्मविओय[6] विसुंठलयं हिययं,
जइ अंगु [7]अणंगसरेहि हयं णिहुयं ।
जइ बाहजलोह[8]कवोलरयं णयणं,
जइ णिच्च मणंमि वियंभिययं मयणं[9] ॥ ११५ ॥

1 A फल । 2 A तुय । 3 A अम्हह । 4 A चिर । 5 C समरतुल्लउ । 6 A विओइ । 7 C अणंगु स° । 8 B C कओल° । 9 B णिच्च मणं वियंभिय मयणं ।

[टिप्पनकरूपा व्याख्या]

निर्गमयित्वा वासरे पुनश्चल्यताम् । पथिकः प्राह–बिम्बाधरे ! दिनबिम्बज्योत्स्ना गोसे–प्रभाते ज्वलति । अतः कारणाद् रात्रावेव कार्ये उत्सुके मया गम्यते । पुनः सा प्राह–हे पथिक ! यद्यस्मिन् स्थाने न तिष्ठसि–गमनमिच्छसि, तदा एकं चूडिलकं खडहडं च गाथां भणेः ॥ ११३ ॥

[११४] हे प्रिय ! तव प्रवासे विरहाग्नेः सकाशात् फलं प्राप्तं इति गत्वा प्रियं भण । किं तत्–चिरंजीवी वरः प्राप्तः । यदेकोऽपि वासरः संवत्सरप्रमाणो जातः ॥ ११४ ॥

[११५].....[अस्य पद्यस्य व्याख्या नोपलभ्यते मूलादर्शे ।]

[अवचूरिका]

बोलयित्वा–निर्गमयित्वा, दिवसे पुनश्चल्यताम् । हे बिम्बाधरे ! दिनबिम्बज्योत्स्ना–आतापो गोसे–प्रभाते ज्वलति । मयाऽत्यौत्सुक्ये कार्ये गम्यते । पुनः सा प्राह–यद्यस्मिन् स्थाने न तिष्ठसि, हे पथिक ! यदि गमनमिच्छसि, तदा चूडिलकं, खडहडकं, गाथां च प्रियाय भणेः ॥

खडहडच्छन्दोलक्षणं यथा–

सगणा इअ वीस य छंद धुअं भणियं, लहु चालीस वीस गुरू सुमणोहरयं ।
खडहडयणामेहि णिच्चु पसिद्धपयं, अइवल्लहणामि दुईय य तं कहिय ॥ १ ॥

[११४] हे प्रिय ! तव प्रवासे विरहाग्नेः फलं प्राप्तमिति गत्वा प्रियं भण । किं तत् ? चिरंजीवी वरः प्राप्तः । यदेकोऽपि वासरः संवत्सरतुल्यो जातः ॥

[११५] यदि मे प्रियवियोगे हृदयं विसंस्थूलम्, यद्यङ्गमनङ्गशरैर्निभृतं यथा हतम्, यदि बाष्पजलौघकपोलरतं नेत्रम्, यदि मनसि नित्यमपि मदनं विजृम्भितम्, तथापि जीव्यते ॥

ता पहिय ! केम णिसि समए पाविज्जइ निवइ य[1] तह णिद्द ।
जीविज्जइ जं पियविरहणीहि दिवसाइ तं चुज्जं ॥ ११६ ॥

*

पहिउ भणइ कणयंगि ! सयलु[2] जं तुम्हि कहिउ,
अन्नइ जं मइ दिट्ठु[3] पयासिसु तं अहिउ ।
पउमदलच्छि पलट्टिहि[4] इच्छहि णियभुवणु[5],
हउं[6] पुणि मग्गि पयट्टउ भंजि म मह गमणु[7] ।
पुव्वदिसिहि[8] तमु पसरिउ, रवि अत्थमणि[9] गउ ।
णिसि कट्ठिहि गम्मियइ, मग्गु दुग्गमु[10] सभउ ॥ ११७ ॥

1 B C निव्वुईय । 2 C दिवसे वि । 3 C सयल । 4 B ईट्ठु । 5 A पलट्टहि; B पलुट्टहिं । 6 C °भुवण । 7 A हउ । 8 B गवणु । 9 B पुव्वदिसउ । 10 B अत्थवणि । 11 C अइदुग्गु भउ ।

[टिप्पनकरूपा व्याख्या]

एतत् खडहडच्छन्दः । लक्षणम्–

"सगणा इय वीस य छंदु धुवं भणियं, लहु चालीस [वीस] गुरू सुमणोहरयं ।
खडहडयनामेहि निच्च पसिद्धपयं, अइवल्लहु नामि दुईय य तं कहियं ॥"

विंशतिः सगणाः, लघु चत्वारिंशत्, विंशतिः गुरवः । अतिवल्लहो नाम–द्वितीयं नाम ।

[११६] तावत् हे पथिक ! निशि निर्वृति[:] निद्रा च कथं प्राप्यते । यत् प्रियविरहिताभिः कैश्चित् (केचिद्) दिवसाः जीव्यन्ते तदेवाश्चर्यम् ॥ ११६ ॥

[११७] पथिको भणति–हे कनकाङ्गि ! यत् त्वया सकलं कथितम्, अन्यत् यन्मया दृष्टं वृत्तान्तम्, तस्मादधिकं प्रकाशयिष्ये । हे पद्मदलाक्षि ! निजभवने प्रयाहि । अहं पुनर्मार्गे प्रवर्त्तामि । मम कृते मार्गो दुर्गमो वर्तते, अन्यच्च सभयः ॥ ११७ ॥

[अवचूरिका]

[११६] तावद् हे पथिक ! निशि निर्वृत्तिः, निद्रा च कथं प्रयाति(प्राप्यते), यत् प्रियविरहिताभिः केचिद्दिवसा जीव्यते तदेवाश्चर्यम् ॥

[११७] पथिको भणति–हे कनकाङ्गि ! यद्भवत्या सकलं कथितम्, अन्यद् यन्मया दृष्टम्, तत् सविशेषं प्रकाशयिष्ये । हे पद्मदलाक्षि ! व्यावृट्, निजभवनं वाम्लय । अहं मार्गे प्रवर्तामि । मम गमनं मा भञ्जय । पूर्वदिशस्तमः प्रसृतम् । रविरस्तमनं गतः । निशि कष्टेन गम्यते । मार्गो दुर्गमः सभयश्च ॥

पहियवयण[1] आयन्निवि[2] पिम्मविओइरिय[3],
ससि उसासु दीहुन्हउ पुण खामोयरिय[4],
अंसुकणोहु कवोलि[5] जु किम्मइ[6] कुइ रहइ,
णं विद्दुमपुंजोवरि मुत्तिउ सुइ सहइ[7] ।
कहइ रुवइ[8] विलवंती पियपावासहइ[9],
भणइ[10] कहिय[11] तह पियह इक्कु[12] खंधउ दुवइ[13] ॥११८॥

*

मह[14] हिययं [15]रयणनिही, महियं गुरुमंदरेण तं णिच्चं† ।
उम्मूलियं असेसं, सुहरयणं[16] कड्ढियं[17] च तुह पिम्मे ॥ ११९ ॥

1 A वयणु । 2 C आयन्नवि । 3 A °विउइरिय; B वियोउरिय । 4 A खामोइरिय । 5 C कउलि; B कवोलिहि । 6 C केमइ । 7 B महई । 8 B सयइ । 9 C °पावासहय; B °पवासह । 10 B भणइं । 11 B कहिय सहिय तर । 12 A इक्क; B इत्थकु । 13 C दुवय । 14 B मम । 15 C रइणि° । † A आदर्शे **'महियं तुह विरहमंदरे णिच्चं ।'** एतादृशः पाठः । 16 C °रइणं; B °रयणा । 17 A B कड्ढियाइं ।

[टिप्पनकरूपा व्याख्या]

[११८] पथिकवचनं श्रुत्वा प्रेमिवियोगितया क्षामोदर्या दीर्घोऽण्(ष्ण)श्वासो मुक्तः । तस्मिन्नवसरे अश्रुकण(णो) यः कोऽपि कपोले तिष्ठति, तन्मन्ये विद्रुमपुञ्जोपरि मौक्तिकं सो(शो)भते । ततः प्रियप्रवासहता रोदिति विलपन्ती पथिकाय कथयति–एकं स्कन्धकं दुवइयं च प्रियं वदेः ॥ ११८ ॥

[११९] मम हि(ह्)दयमेव रत्ननिधिः । तत् तव गुरुविरहमन्दरेण नित्यं मथितम् । उन्मूल्य सुखरत्नं समग्रं निष्कासितम् ॥ ११९ ॥

द्विपदीछन्दः । तल्लक्षणम्–

पढमगणे कलछक्कं चउक्कला पंच हुंति कमलंता ।
गुरुमज्झसव्वलहुया दुवईए बीयछट्ठंसा ॥ १ ॥

[अवचूरिका]

[११८] पथिकवचनं श्रुत्वा प्रेमविउ(यो)गतया क्षामोदर्या दीर्घोष्णः श्वासो मुक्तः । तस्मिन्नवसरेऽश्रुकणो यः कोऽपि कपोले तिष्ठति, तन्मन्ये विद्रुमपुञ्जोपरि मौक्तिकं शोभते । ततः प्रियप्रवासहता रोद(दि)ति विलवं(पं)ती पथिकाय कथयति–हे पथिक! एकं स्कन्धकं दुवयं च प्रियं–भर्त्तारं वदेः ॥

[११९] मम हृदयमेव रत्ननिधिः । तत्तव गुरुविरहमन्दरेण नित्यं मथितम् । उन्मूल्य सुखरत्नं निष्काशितम् ॥

मयणसमीरविहुय[1] विरहाणल[2] दिट्ठिफुलिंगणिब्भरो,
दुसह[3] फुरंत तिव्व मह हियइ[4] निरंतर झाल[5] दुद्धरो[6] ।
अणरइछारुछित्तु पच्चिल्लइ तज्जइ ताम दड्ढए[7],
इहु अच्चरिउ तुज्झ[8] उक्कंठि सरोरुह[9] अम्ह वड्ढए ॥ १२० ॥

*

खंधउ दुवइ[10] सुणेवि[11] अंगु रोमंचियउ,
णेय पिम्म[12] परिवडिउ[13] पहिउ मणि[14] रंजियउ[15] ।
तह[16] पय जंपइ मियनयणि सुणिहि[17] धीरि[18] खणु[19],
किहु पुच्छउ ससिवयणि पयासहि[20] फुड[21] वयणु ॥१२१॥

*

1 A °विहूय°। 2 B °हानलि। 3 B C दुसहु फुरंतु। 4 C हियय। 5 B झालं। 6 C दुद्धरे। 7 B दइए। 8 A तुम्ह। 9 C सरोसहु। 10 A दुवेइ। 11 B सुणेविणु। 12 B पिमु। 13 C परिवडियउ। 14 A मण। 15 B रंचियउ। 16 A C तह जंपइ। 17 A सुणि तह; C सुणहि। 18 C धीरयसु। 19 A C खण। 20 B पयासइ। 21 B फुडु।

[टिप्पनकरूपा व्याख्या]

[१२०] मदनसमीरणेन विधूतो विरहानलो वर्त्तते। कीदृशः – दु(द्द)ष्टिफुलिंगैः निर्भरः – भृत इत्यर्थः। तीव्रं मम हि(ह्द)दये स्फुरन् ज्वलन्। पुनः कीदृशः – नि[रं]-तरज्वालादुर्धरः। पुनः – अरतिरक्षायुक्तः। मां परलोकाय प्रेरयति। तदकुर्वन्तीं तर्जयति वर्द्धते। परमेतदाश्चर्यं तवोत्कण्ठया सरोरुहं वर्द्धते । अग्नौ कमलं कथं वर्द्धते ? – अत्र तु सरोरुहं श्वासः (श्वासम्) ॥ १२० ॥

[१२१] स पथिकः स्कन्धकं दुपदीं च श्रुत्वा, अङ्गे रोमाञ्चकञ्चुको बभूव। तथा प्रेमो(म) न गतः(तम्)। तया पथिकस्य मनो रञ्जितः(तम्)। तथापि हे मृगनेत्रे ! मनो धीरय(यि)त्वा कानिचित् पदानि जल्प । पुनः, तथाऽहं किञ्चित् पृच्छामि। यदि शशिवदने ! स्फुटं – प्रकटं प्रजल्पसि ॥ १२१ ॥

[अवचूरिका]

[१२०] मदनसमीरणेन विधूतो विरहानलो वर्त्तते। कीदृशः – दृष्टिस्फुलिङ्गैर्निर्भरः – भृत इत्यर्थः। तीव्रं मम हृदये स्फुरन् ज्वलन् । पुनः कीदृशः – निरन्तरज्वालादुर्धरः । पुनररति-रक्षायुक्तः। मां परलोकाय प्रेरयति। तदकुर्वन्तीं लज(तर्ज)यति वर्द्धते दहति च। परमेतदाश्चर्यं तवोत्कण्ठया सरोरुहं वर्द्धते। अत्र तु सरोरुहं श्वासम् ॥

[१२१] स्कन्धं द्विपदीं च श्रुत्वा अङ्गं रोमाञ्चितम्, प्रेम नैव परिपतितम्। पथिको मनसि रञ्जितः। तां प्रति जल्पति – शृणु, क्षणं धीरा भव, हे शशिवदने ! किमपि पृच्छामि, स्फुटं – प्रकटं यदि प्रकाशयसि ॥ द्विपदीछन्दोलक्षणं यथा –

"पढमगणे कलछक्कं, चउक्कला पंच हुंति कमलंता।
गुरुमज्झसव्वलहुया, दुवईए वीयछट्ठुसा ॥"

णवघणरेहविणग्गय[1] निम्मल[2] फुरइ करु,
सरय[3]रयणि[4] पच्चक्खु[5] झरंतउ[6] अमियभरु ।
तह चंदह जिणणत्थु[7] पियह संजणिय सुहु,
कइयलग्गि[8] विरहग्गिधूमि[9] झंपियउ[10] मुहु ॥ १२२ ॥
वंककडक्खिहि[11] तिक्खिहि[12] मयणाकोयणिहिं[13],
भणु वट्टहि कइ[14] दियहि झुरंतिहिं[15] लोयणिहिं ।
जालंधरि[16] व सकोमलु[17] अंगु सोसंतियह[18],
हंससरिस सरलयवि गयहि लीलंतियह[19] ॥ १२३ ॥
इम[20] दुक्खह तरलच्छि कांइ[21] तइ[22] अप्पियइ[23],
दुस्सह[24] विरहकरवत्तिहि[25] अंगु करप्पियइ[26] ।

1 C °विणगउ । 2 C निम्मलु । 3 A सरइ । 4 A रइणि । 5 A पच्चक्ख । 6 B झुरंतउ । 7 C जिणणत्थ । 8 A कईअ अग्गि । 9 B नास्ति 'धूमि' । 10 C कंपियउ । 11 B C °कडिक्खिहि । 12 A तिक्खि; B तिक्खहि । 13 A मयणुक्कोयणिहि; B C कोइणिहि । 14 A कय । 15 A झुरंतउ । 16 C जालंधर । 17 A B सकोयलु । 18 C सुसंतियह । 19 C लीलंतियहि । 20 B इमइ दुक्ख । 21 A B काइ । 22 A तणु । 23 A अप्पीअइ । 24 C दुसहु विरहु । 25 C करवित्तिहि । 26 A करीप्पीअइ ।

[टिप्पनकरूपा व्याख्या]

[१२२] नूतनमेघरेखाविनिर्गतचन्द्रवद् निर्म्मलं तव वदनं वर्त्तते । यथा रजन्यां प्रत्त(त्य)क्षो अमृतकरो अमृतं झू(झ)रन् सो(शो)भते । तद् वदनं चन्द्रसदृक्षं कं दिनमारभ्य विरहाग्नौ झम्पितः(तम्)-इयामीकृत(तम्) इत्यर्थः ॥ १२२ ॥

[१२३] वद कं दिनमारभ्य वक्रकटाक्षतीक्ष्णाभ्यां मदेन कूणिताभ्यां वर्षन्ती वर्त्तसे । कदलीवत् सकोमलदलं अङ्गं शोषयन्ती, हंससदृक्षां सलिलां गतिं सरलयन्ती कं दिनमारभ्य वर्त्तसे ॥ १२३ ॥

[१२४] कं दिनमारभ्य एवं दुरका(दुःखा)य तरलाक्षि ! त्वया निजात्मा अर्प्यते ।

[अवचूरिका]

[१२२] नवघनरेखाविनिर्गतनिर्मलस्फुरत्करः शरद्भवन्यां प्रत्यक्षममृतभरं क्षरन् एवंविधो यश्चन्द्रः, तस्य जयनार्थं प्रियस्य संजनितसुखमेवं विशिष्टं मुखं कं दिनमारभ्य विरहाग्निधूम्रेण झम्पितम् ॥

[१२३] वक्रकटाक्षतीक्ष्णाभ्यां मदनाकोचनाभ्यामेवंविधाभ्यां लोचनाभ्यां भण कं दिनमारभ्य क्षरन्त्यां वर्तसे । जालन्धरी = कदलीवत् सकोमलमङ्गं शोषयन्ती वर्तसे । हंससदृक्षां गतिं सरलां कृत्वा लीलयन्ती वर्तसे । प्रायः स्त्रियः सकामा वक्रगतयः ॥

[१२४] हे तरलाक्षि ! एवं-पूर्वोक्तप्रकारेण, त्वया-भवत्या अङ्गं दुःखाय किमित्यर्प्यते ।

[1]हरिसुयबाणखुरप्पिहि[2] कइ दिण[3] मणु पहउ,
भणु कइ कालि[4] पडुत्तउ[5] सुंदरि तुअ[6] सुहउ ॥ १२४ ॥

*

पहियवयण आइन्निवि दीहरलोयणिहि ।
पढियउ[7] गाहचउक्कउ[8] मयणाकोयणिहि[9] ॥ १२५ ॥
[अर्द्धम्, कुलकं पञ्चभिः ।]

*

आएहि[10] पहिय किं पुच्छिएण[11] मह पियपवासदियहेण[12] ।
हरिऊण जत्थ सुक्खं लद्धं दुक्खाण पडिवट्टं[13] ॥ १२६ ॥

---

1 C हरसुइ° । 2 A °खरप्पिहि; B °खुरपुप्पहि । 3 A कइ दिणु; C कइदिणि मुण। 4 A काल । 5 C पडत्तउ । 6 B तुय; C सुह । 7 A पढिउ । 8 B °चउक्कु । 9 A मइणक्कोइणिहिं; C मयणुक्को° । 10 B अइएह । 11 C पुच्छिएहिं । 12 C दियहेहिं। 13 A पडिवत्तं ।

[दिप्पनकरूपा व्याख्या]

विरहक[र]पत्रैः, अङ्गं किमिति कल्प(कर्प्य)ते । हरिसुतः – कन्दर्प्पः, तस्य बाणक्षुरप्रैः कं दिनमारभ्य मनः प्रहतम् । कस्मिन् दिने तव भर्त्ता प्रचलितः ॥ १२४ ॥

[१२५] एवं पथिकेन पृच्छा कृता, इति प्रथमे(मम्) । घनरेखाविनिर्गतशारदशशिजयनार्थं 'समुहं' स्वमुखं भवत्या कं दिनमारभ्य विरहाग्निना झम्पितम्, इति द्वितीय [प्रश्नम्] । लोचनाभ्यां अश्रु क्षरन्त्या कदलीसमानं देहं सोख(शोष)यन्त्या कानि (कति ?)दिनानि जातानि, इति तृतीयप्रश्नम् । एवं दुःखायात्मा किमिति प्रदीयते, कन्दर्प्प[ती]क्षणक्षुरप्रैः कदा मनः प्रहतम्, त्वत्पतिः कदा प्रस्थितः, इति चतुर्थप्रश्नम् । पथिकवचनं श्रुत्वा दीर्घाक्षा(क्ष्या) गाथाचतुष्कं पठितम्, इति पञ्चमम् ॥ १२५ ॥

[१२६] हे पथिक ! मत्प्रियप्रवासदिनेन पृष्टेन किम् । यस्मिन् दिने सौख्यं त्याज्य(त्यक्त्वा) दुःखानां प्रतिपट्टं प्राप्तम् ॥ १२६ ॥

[अवचूरिका]

दुःसहविरहकरपत्रेण अङ्गं किमिति कर्प्यते – खण्ड्यते । हरिसुतस्य – कन्दर्पस्य [बाण]क्षुरप्रैः कं दिनमारभ्य, ते – तव मनः प्रहतम् । हे सुन्दरि ! भण, तव सुभगः – भर्त्ता कस्मिन् दिने प्रस्थितः ॥

[१२५] पथिकवचनं श्रुत्वा दीर्घाक्ष्या गाथाचतुष्कं पठितम् ॥

[१२६] हे पथिक ! आकर्णय, मत्प्रियप्रवासदिवसेन पृष्टेन किम् । यस्मिन् सौख्यं त्यज (त्यक्त्वा) दुःखानां प्रतिपट्टं प्राप्तम् ॥

ता कहसु तेण किं सुमरिएण विच्छेयजालजलणेण* ।
जं[1] गओ खणद्धमत्तो णामं मा तस्स दियहस्स ॥ १२७ ॥
जत्थ गओ सो सुहओ तद्दिह[2] दिवसाउ अम्ह अणियत्ती ।
णिच्छउ हियए पंथिय कालो कालु व्व परिणमइ ॥ १२८ ॥
मुक्काऽहं जत्थ पिए[3] डज्झउ गिम्हानलेण सो गिम्हो ।
मलयगिरिसोसणेण[4] य सोसिज्जउ सोसियां[5] जेण ॥ १२९ ॥

* C आदर्शे 'जालियविओयजलणेणं' एतादृशः पाठः । 1 B जत्थ । 2 B तद्दिहु; C तद्दिय । 3 C पिएण । 4 C मलयगिगसिणेण; B मलयगिरिसो° । 5 B सोसियं ।

[टिप्पनकरूपा व्याख्या]

[१२७] तावत् कथय–तेन दिवसेन ज्वालितवियोगाग्निना स्मृतेन किम् । यस्मिन् क्षणार्धमात्रे स गतः । अतस्तस्य दिवसस्य नाम मा गृह्णीयाः ॥ १२७ ॥

[१२८] यद्दिनमारभ्य स सुहृदो भर्त्ता प्रस्थितः, तद्दिनमारभ्यास्माकं अनिवृत्तिर्या(जा)ता । भो पथिक ! स कालः–दिवसः कालवन्निश्चितं हि(ह्र)दये परिणमति ॥ १२८ ॥

[१२९] यत्र ग्रीष्मे प्रियेणाहं मुक्ता, स ग्रीष्मः ग्रीष्मानलेन दह्यतु । मलयाचलसोषन(शोषण)पवनैः स शोष्यतु येनाहं शोषिता ॥ १२९ ॥

*

॥ इति संदेशरासकवृत्तौ श्रीदेवेन्द्रसूरिविष्य वा० श्रीलक्ष्मीचन्द्रविरचितायां संदेशप्रदाननाम द्वितीयः प्रक्रमः ॥

*

[अवचूरिका]

[१२७] तावत् कथय–तेन दिवसेन ज्वालितवियोगाग्निना स्मृतेन किम् । यस्मिन् क्षणार्धेन स गतः । अतस्तस्य दिवसस्य नाम मा गृह्णीयाः ॥

[१२८] यस्मिन् दिने स गतस्तस्मादिनादस्माकमनवृ(निर्वृ)त्तिर्जाता । निश्चितं हे पथिक ! अस्मद्हृदये कालः–समयः काल इव परिणमति ॥

[१२९] यत्र–यस्मिन्निदाघे अहं प्रियेण मुक्ता, स ग्रीष्मो ग्रीष्मानलेन–रौद्रवैश्वानरेण दह्यताम्, स ग्रीष्मः श्रीखण्डशोषणेन शुष्यतु, येन ग्रीष्मेण शोषिता ॥

— ३ तृतीयः प्रक्रमः —

[अतो ग्रीष्मवर्णनम् ।]

णवगिम्हागमि पहिय[1] णाहु[2] जं पवसियउ[3],
करवि[4] करंजुलि सुहसमूह[5] मह णिवसियउ[†] ।
तसु[6] अणुअंचि[7] पलुट्टि[8] विरहहवितविय[9] तणु,
वलिवि पत्त[10] णियभुयणि विसंठुल [11]विहलमणु[12] ॥ १३० ॥
तह अणरइ रणरणउ[13] असुहु असहंतियहं[14],
दुस्सहु मलयसमीरणु मयणाकंतियहं[15] ।
विसमझाल झलकंत जलंतिय तिव्वयर,
महियलि[16] वणतिणदहण तवंति य तरणिकर[17] ॥१३१॥

---

1 C पहिए । 2 C गह । 3 C पविसिउ । 4 B करिवि । 5 B °समुह । † C आदर्शे पतित एष पादः । 6 A तणु । 7 B °अंचु । 8 B पलुट्टवि । 9 A °तविउ । 10 C पत्ति । 11 C विह्वलमण । 12 A °मणि । 13 C रणारणउ । 14 C असहंतयहं । 15 C मयणकंतयहं । 16 B महियल । 17 B तिव्वकर ।

[टिप्पनकरूपा व्याख्या]

[१३०] अथ ग्रीष्मर्तुवर्णनं कविराह – 'णवगिम्हा०' – हे पथिक ! नवग्रीष्मागमे नाथः प्रवसितः, तदैवाऽलिं कृत्वा – हास्यनमस्कारं कृत्वा सुखमपि प्रवसितम् । तदनु व्याघुट्य विरहाग्नितापिततनुषी विसंस्थुल – विह्वलङ्गलमानसा गृहमागता ॥ १३० ॥

[१३१] तथा अरतिं रणरणकं असुकखं(खं) च सहन्त्या मम मदनार्त्तायां मलयसमीरणो दुःसहो बभूव । तथा तरणिकरा विषमज्वालया ज्वलन्तमहीतलवनतृणदाहकास्तपन्ते ॥ १३१ ॥

[अवचूरिका]

[१३०] अतो ग्रीष्मत्वं व्याचख्यासुराह – 'णवगिम्हा०' – हे पथिक ! नवग्रीष्मकालागमे नाथः प्रवशि(सि)तः । तदैवाऽलिं कृत्वा – हास्यनमस्कारं कृत्वा सुखमपि प्रवशि(सि)तम् । तदनु व्याघुट्य विरहाग्नितापिततनुषी विसंस्थुला विह्वलङ्गलमानसा गृहमागता ॥

[१३१] तथा – अरतिं रणरणकं असुखं च सहन्त्या मम मदनार्त्तायां मलयसमीरणो दुःसहो बभूव । तथा तरणिकरा विषमज्वालया ज्वलन्तमहीतलवनतृणदाहकास्तपन्ते ॥

जमजीहह णं चंचलु णहयलु[1] लहलहइ,
तडतडयड[2] धर तेडइ ण तेयह[3] भरु सहइ ।
अइउन्हउ[4] वोमयलि पहंजणु जं वहइ[5],
तं झंखरु विरहिणिहि[6] अंगु फरिसिउ[7] दहइ ॥ १३२ ॥
पिउ चावइहि[8] भणिज्जइ नवघण कंखिरिहिं,
सलिलनिवहु[10] तुच्छच्छउ[11] सरइ तरंगिणिहिं ।
फलहारिण उन्नमियउ[12] अइसच्छयइ[13] सुहि,
कुंजरसवणसरिच्छ पहल्लिर[14] गंधवहि[15] ॥ १३३ ॥
तह पत्तिहि संसग्गिहि[16] चूयाकंखिरिय[17],
कीरपंति परिवसइ[18] णिवड[19] णिरंतरिय[20] ।
लइ पल्लव झुल्लंति[21] समुट्ठिय करुणझुणि,
हउ किय णिस्साहार पहिय[22] साहारवणि ॥ १३४ ॥

* [युग्मम्]

1 A णहीयलु । 2 C तडिइडि । 3 B तेहय; C तेअह । 4 B डोमयलि । 5 B वहइं । 6 B विरहिणीहि; C विरहिणिअंगु । 7 B फरसिउ; C फरिसउ । 8 C वावहि । 9 C किंखिरिहिं । 10 A °निवउ । 11 C तुच्छछहु । 12 C उन्नवियउ । 13 C अइसुच्छह । 14 B पहिल्लिर; C पहुल्लिर । 15 C गंधविहि । 16 B सहसग्गिहि । 17 C वूयाकंखिरिहि । 18 C °वयइ । 19 B निविड । 20 A णिवडंतरिय; C निरंतरिहिं । 21 B झुलंत । 22 C साहीर° ।

[टिप्पनकरूपा व्याख्या]

[१३२] वितर्के चञ्चलं नभस्तलं यमजिह्वावल्लहलहति । त्रडत्रडत्रडदिति धरा सु(शु)ष्यन्ती–शब्दं करोति । तेजोभरं न सहते । अत्युष्णः प्रभञ्जनो वहति । झंखरो डुडुंयालकनामा पवनः विरहिणीनामङ्गं स्पृष्ट्वा दहति ॥ १३२ ॥

[१३३–१३४] नवघनोत्कण्ठितैश्चातकैः "प्रिय प्रिय" इति शब्दो भण्यते स्म । तरङ्गिणीषु सलिलप्रवाह[:]तुच्छाच्छ[:] सरति स्म । अथ षट्सु पदेषु सहकार-वर्णनम्–फलभारेणोन्नमितं शुभं सहकारवनं अतिसच्छायति–अधिकं शोभते ।

[अवचूरिका]

[१३२] वितर्के–चञ्चलं नभस्तलं यमजिह्वावत् लहलहति । त्रडत्रडत्रडदिति धरा शुष्यन्ती–शब्दं करोति । तेजोभरं न सहते । अत्यण्य(त्युष्णः)प्रभञ्जनो व्योमतले वहति । झसरो डुण्डया-लकनामा पवनो विरहिणीनामङ्गं स्पृष्ट्वा दहति ॥

[१३३–१३४] नवघनोत्कण्ठितैश्चातकैः "प्रिय प्रिय" इति शब्दो भण्यते स्म । तरङ्गिणीषु सलिलप्रवाह[:]तुच्छाच्छस्सरति स्म । अथ षट्सु पदेषु सहकारवर्णनम्–फलभारेणोन्नमितं शुभं

हरियंदणु[1] सिसिरत्थु[2] उवरि जं[3] लेवियउ,
तं सिहणह[4] परितवइ अहिउ [5]अहिसेवियउ ।
ठविय विबिह विलवंतिय अह तह[6] [7]हारलय,
कुसुममाल तिवि मुयइ[8] झाल तउ[9] हुई सभय ॥ १३५॥
णिसि सयणिह[10] जं खित्तु सरीरह[11] सुहजणणु,
विउणउ[12] करइ उवेउ[13] कमलदलसत्थरणु ।
इम सिज्जह उट्ठंत पडंत सलज्जिरिहिं[14],
पढिउ वत्थु तह दोहउ[15] पहिय सगग्गिरिहिं[16] ॥ १३६ ॥

*

1 A हरिचंदणु । 2 A ससिरत्थुउ; C सिसरत्थि । 3 C उवरिज्ज । 4 B सिहणप्परि°; C सिहणोवरि । 5 C अह° । 6 B तहि । 7 B हारि° 8 A मुइयइ; B मुझइ । 9 A हउ; B त । 10 A सयणहं । 11 C सरीरहु । 12 B C विणउ । 13 B उव्वेउ । 14 A B सलज्जरिहिं । 15 C दूहड । 16 A सगिग्गिरहिं ।

[टिप्पनकरूपा व्याख्या]

अन्यच्च – यत्र कुञ्जरश्रवणसदृक्षेषु गन्धवहेन प्रकम्पितेषु आम्रपत्रेषु, चूतोत्कण्ठिता संसर्गिणी परिवारिता प्रेङ्खोलन्ती कीरपङ्क्तिर्वर्त्तते । ततः करुणध्वनिः समुत्थिता । तां श्रुत्वाऽहं निस्साधारा जाता । तन्मन्ये हे पथिक ! सर्वरञ्जकेनाहं विरञ्जिता ॥ १३३–१३४ ॥

[१३५] हरिचन्दनं यत् शैत्यार्थं उरसि लेपितं तदप्यहिसेवितत्वात् कुचौ तापयति । तथा विविधं विलपन्त्या हारलता कुसुममाला च शैत्यार्थं उरसि न्यस्ते, तेऽपि ज्वालां मुञ्चतः । ततो मरणशङ्किनी सभया जाता ॥ १३५ ॥

[१३६] निसि(शि) शरीरसुखार्थं कमलदलप्रस्तरणं कृतं तदपि द्विगुणमुद्वेगं करोति । एवं स(श)य्यातः उत्तिष्ठन्त्या, निर्बलत्वात् तत्रैव पतन्त्या, वस्तुको दोधकश्च सलज्जया सगद्गदगिरा पठितः ॥ १३६ ॥

[अवचूरिका]

सहकारवनमतिसच्छायमधिकं शोभते । अन्यच्च – यत्र कुञ्जरश्रवणसदृशेषु गन्धवहेन प्रकम्पितेषु आम्रपत्रेषु चूतोत्कण्ठिता संसर्गिणी परिवारिता प्रेङ्खोलन्ती कीरपङ्क्तिर्वर्तते । ततः करुणध्वनिः समुत्थिता । तां श्रुत्वा अहं निराधारा जाता । तन्मे(मन्ये) हे पथिक ! सर्वरञ्जकेन अहं विरञ्जिता ॥ युग्मम् ॥

[१३५] हरिचन्दनं यत्सैला(यच्छैत्या)र्थं उरसि लेपितं तदप्यहिसेवितत्वात् कुचौ तापयति । तथा विविधं विलपन्त्या हारलता कुसुममाला च शैत्यार्थं उरसि न्यस्ते, ते अपि ज्वालां मुञ्चतः । ततो मरणशङ्किनी सभया जाता ॥

[१३६] निशा(शि) रात्रौ शयनीये शरीरसुखजनकं यत्कमलदलस्तरणं कृतं तद्विगुणमुद्वेगं करोति । एवं शय्या(य्या)या उत्तिष्ठन्त्या सलज्जया सगद्गदं यथा भवति तथा वस्तुको दोधकश्च मया पठितः ॥

वियसावि य रवियरहिं[1] तविहिं[2] अरवि य[3] तवणि,
अमियमयूहु ण सुह जणइ[4] दहइ विसजम्मगुणि ।
दसिउ दसणिहिं भुअंगि[5] अंगु चंदणु[6] खयहि[7],
खिवइ हारु खारुब्भवु कुसमसरच्छयहिं[8] ।
राईव चंदु चंदणु रयण सिसिर भणिवि जगि[9] संसियहिं[10] ।
उल्हवइ ण केणइ विरहज्झल[11] पुण वि[12] अंग परीहिंसियहिं[13] ॥१३७॥
तणु घणसारिण[14] चंदणिण अलिउ जि किवि चच्चंति[15] ।
पुण वि पिएण व उल्हवइ पियविरहग्गि[16] निभंति ॥ १३८ ॥

*

1 B रविभवहि; C रवियरिहि । 2 C तवहि । 3 C रविय; B अरवितावि य । 4 A अमिय अमउ विसु जणइ; C अमिय मओ विहु जणइ । 5 B डसणिहिं दशइ भुयंगु; C डंसउ दुसहु भु° । 6 B चंदणि । 7 A खिवइ; C दहइ । 8 B सरत्थइहिं; C सरिच्छयइ । 9 C जग्गि । 10 B संसइहिं । 11 B विरहुतह; C विरहहव । 12 A अंगि; B अंगु । 13 A °हिंसीअहिं । 14 A °सरिण । 15 B चव्वंति । 16 A विरहिग्गि ।

[टिप्पनकरूपा व्याख्या]

[१३७] अरविय–अरविन्दानि रविकरैः विकसापितानि, तपनगुणत्वात्, तपन्ति, इत्यपि । अमृतमयूषो (°खो) विषेण सह जन्मत्वात् असुखं जनयति । च शब्दाद् दाहयति च । चन्दनं भुजङ्गदशनैः दष्टम्, अतोऽङ्गं क्षि(क्ष)पयति । हारः क्षारोद्भवः, अतोऽङ्गं क्ष(क्षि)पति । केषां कुसुमस(श)रक्षतानाम् । राजीव–चन्द्र–चन्दन–रत्नानि शिशिराणि उच्यन्ते, परं विरहाग्निज्वाला केनापि न विध्याति, अतः पुनरङ्गानि परिहिंस्यन्ते ॥ १३७ ॥

[१३८] ये केचन जनाः तनुः घनसारेण=कर्पूरेण चन्दनेन चर्चयन्ति, तदलीकम् । यतः प्रियवियोगाग्निः प्रिए(ये)णैव विध्याति । ध्रुवं पथिक अत्र भ्रमो न ॥ १३८ ॥ ग्रीष्मवर्णना ॥

[अवचूरिका]

[१३७] अरविन्दानि रविकरैर्विकसापितानि, तपनगुणत्वात्, तपन्ति इत्यपि । अमृतमयूखो विषेण सह जन्मत्वाद् असुखं जनयति दाहयति च । चन्दनं भुजङ्गदशनैर्दष्टमतः अङ्गं क्षपयति । हारः क्षारोद्भवः अतोऽङ्गं क्षिपति, केषां कुसुमशरक्षतानाम् । राजीव–चन्द्र–चन्दन–रत्नानि शिशिराण्युच्यन्ते, परं विरहाग्निज्वाला केनापि न विध्याति । अतोऽङ्गानि परिहिंस्यन्ते ॥

[१३८] एतदलीकं यद् विरहार्त्ता तनुः=शरीरं घनसारेण=कर्पूरेण चन्दनेन चर्चयन्ती–लिम्पयन्ती । पुनर्विरहाग्निः प्रियेणैव निर्भृतं विध्याति ॥ इति ग्रीष्मवर्णना समाप्ता ॥

[अथ वर्षावर्णनम् ।]

इम तवियउ[1] बहु गिंभु कह [2]वि मइ[3] वोलियउ,
पहिय पत्तु पुण[4] पाउसु[5] धिट्ठु ण पत्तु पिउ ।
चउदिसि[6] घोरंधारु पवन्नउ गरुयभरु,
गयणि गुहिरु घुरहुरइ[7] सरोसउ अंबुहरु[8] ॥ १३९ ॥
पउदंडउ[9] पेसिज्जइ[10] झाल [11]झलकंतियइ,
भयभेसिय अइरावइ गयणि खिवंतियइ ।
रसहि सरस वव्वीहिय[12] णिरु तिप्पंति[13] जलि,
बगह[14] रेह णहि रेहइ णवघण जंति[15] तलि ॥ १४० ॥
गिंभ[16] तविण[17] खर ताविय बहु[18] किरणुक्करिहिं[19],
पउ पडंतु पुक्खरहु[20] ण मावइ पुक्खरिहिं[21] ।

1 C तविउ । 2 A कहव; B कह करि । 3 B नास्ति; C मुइ । 4 B पुणु । 5 C पावसु । 6 A चउदिसु; C चहुदिसि । 7 C घुरहु° । 8 A B अंवहरु । 9 °डंडउ । 10 C पेसिय । 11 A कलकं° । 12 A वव्बीहिय; B वावीहिय; C वव्वीहयं । 13 B तिव्वंति । 14 A B बयह । 15 C णवघ जंत । 16 B गिम्ह° । 17 C तविणु; B तवणि । 18 B C 'बहु' नास्ति । 19 B किरणुक्करकिरिहि । 20 B पुष्करहु । 21 B पुष्करिहि; C पुखरहि ।

[टिप्पनकरूपा व्याख्या]

[१३९] अथ वर्षावर्णनामाह – एवं ग्रीष्मो बहुतप्तः – अत्युष्णः कष्टं कृत्वा मया निर्गमितः । तदनु वर्षाकालः प्राप्तः, परं धृष्टो न प्रियः । चतुर्दिक्षु घोरान्धकारो गुरुभर(रं) प्रपन्नोऽम्बुधरो गगने सरोसं(षं) यथा गर्जति ॥ १३९ ॥

[१४०] भयभीषणया ऐरावत्या गगने द्योतन्त्या ज्वालावद् देदीप्यमानया पगदण्डगश्चरणमार्गो दृश्यते । वप्पीहकाः सरसं रसन्ति, नितरां जलेन [तृ]प्यन्ति । अन्यच्च – नभसि नवघनतले गच्छन्ती बकानां श्रेणिः शोभते ॥ १४० ॥

[१४१] ग्रीष्मतपनखरतप्तकिरणोत्कर्षसम्बधि पयः पुष्करात् पतत् पुष्करणीषु

[अवचूरिका]

[१३९] अथ वर्षावर्णनमाह – एवं ग्रीष्मो बहुतप्तः – अत्युष्णः कष्टं कृत्वा मया निर्गमितः । तदनु वर्षाकालः प्राप्तः, [परं] धृष्टो न प्रियः । चतुर्दिक्षु घोरान्धकारो गुरुभरं प्रपन्नोऽम्बुधरो गगने सरोषं यथा गर्जति ॥

[१४०] भयभीषणया ऐरावत्या विद्युता गगनं द्योतन्त्या ज्वालावद्देदीप्यमानया पगदण्डश्चरण-मार्गो दृश्यते । बब्बीहकाः सरसं रसन्ति, नितरां जलेन तृप्यन्ति । अन्यच्च – नभसि नवघनतले गच्छन्ती बकानां श्रेणिः शोभते ॥

[१४१] ग्रीष्मतपनखरतप्तकिरणोत्कर्षसम्बन्धि पयः पुष्करावतैवत् पतत् पुष्करीषु – नदीषु न

पयहत्थिण किय पहिय पयहि[1] पवहंतयह[2],
पइ[3] पइ पेसइ[4] करलउ गयणि[5] खिवंतयह[6] ॥ १४१ ॥
णिवडलहरि घणअंतरि संगिहिं[7] दुत्तरिहिं[8],
करि करयलु[9] कल्लोलिहि गज्जिउ वरसरिहिं[10] ।
दिसि पावासुय[11] थक्किय णियकज्जागमिहिं,
गमियइ[12] णाविहिं[13] मग्गु पहिय ण तुरंगमिहिं ॥१४२॥
कद्दमलुल[14] धवलंग विहाविह सज्झरिहिं[15],
तडिनए वि[16] पयभरिण अलक्ख सलज्जरिहि[17] ।
हुउ[18] तारायणु अलखु वियंभिउ तमपसरु,
छन्नउ[19] इंदोएहि निरंतरु[20] धर सिहरु[21] ॥१४३॥ [क्षेपक ?]

1 B पइहि; A पहिहि । 2 A पवहंतयहि; B पवहंतियह; C पवहंतियइ । 3 C पय पय । 4 C पेसउ । 5 C गयण । 6 A खिवंतियहि; B खिवंतियह । 7 C संगिण । 8 B C दुत्तरहिं । 9 B कलयलु; C करयरु । 10 C वरसरहि; A सुरवरिहिं । 11 B पवासुइय । 12 C गमियइं । 13 B नाविह । 14 A कइयसलिल; C कद्दमलु । 15 A B °झरहि । 16 B तडिनएहि; A तडविएइ । 17 B सलजरहिं; C सलिजिरिहि । 18 B हुव; C हुय । 19 B छन्नउइउदोइहि; C छन्नउइदउएहि । 20 B नास्ति । 21 C धरसिहरि; A सिहरधरु ।

[टिप्पनकरूपा व्याख्या]

न माति । यतः–'सहस्रगुणमुत्स्रष्टुं(त्स्रष्टु)मादत्ते (त्तें) हि रसं रविः' । तथा च पथि प्रवसन्तः पथिकाः पयोभिः पदत्राणहस्ताः कृताः । गगने विद्युता करलः पगदण्डको दृश्यते, नान्यथा ॥ १४१ ॥

[१४२] कल्लोलैर्निबिडलहरीघनान्तरसंसर्गेण दुस्तरैर्वरसरितासु गर्जितम् । दिशः प्रवासतः [स्थिताः] । अथ चेत् कार्यागमे प्रवासः, तदा नौभिर्गम्यते न तुरङ्गमैः ॥ १४२ ॥

[१४३] क्षेपकम्–धरा स्त्री मेघभर्त्ता(र्त्रा)गमे, यथा स्त्रीभर्तृसङ्गमे श्रीखण्डविलेपनं करोति । पार्श्वावाच्छादयति सलज्जत्वात् । तारा-आयतने–नेत्रे अलक्ष्ये

[अवचूरिका]

माति । यतः–'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः' । तथा च पथि प्रवसन्तः पथिकाः पयोभिः पदत्राणहस्ताः कृताः । गगने विद्युता करलः पगदण्डको दृश्यते, नाऽन्यथा ॥

[१४२] कल्लोलैर्निबिडलहरीघनान्तरसंसर्गेण दुस्तरैर्वरसरितासु गर्जितम्, दिशः प्रवास(स)तः स्थिताः । अथ चेत् कार्यागमे प्रवासस्तदा नौभिर्गम्यते न तुरङ्गमैः ॥

[१४३] क्षेपकः–धरा स्त्री मेघभर्त्रागमे, यथा स्त्री भर्तृसङ्गमे श्रीखण्डविलेपनं करोति ।

बगु[1] मिल्हवि[2] सलिलद्दहु तरुसिहरिहि चडिउ,
तंडवु[3] करिवि सिहंडिहि[4] [5]वरसिहरिहि रडिउ[6] ।
सलिलिहि[7] वर[8] सालूरिहि फरसिउ[9] रसिउ सरि[10],
कलयलु कियउ कलयंठिहि चडि चूयह[11] सिहरि ॥१४४॥

णाय णिवड पह रुद्ध फणिंदिहिं[12] दह[13] दिसिहिं,
हुइय[14] असंचर मग्ग महंत महाविसिहिं[15] ।
पाडलदलपरिखंडणु नीरतरंगभरि,
उरुन्नउ गिरिसिहरिहि हंसिहि करुणसरि ॥ १४५ ॥

---

1 A बउ । 2 A मिल्हिवि । 3 A तंडउ; C तंडवु । 4 C सिहम्मिहि । 5 C वरु° । 6 C रड्यउ । 7 A सललिहि; C सलिलिहि । 8 C वरि । 9 A फरसउ; C फरिसिउ । 10 A B सरु । 11 B चूयहं; C वूयह । 12 C [फ] णिदहिं । 13 C दस । 14 B हुईय । 15 B C महव्विसहिं ।

[टिप्पनकरूपा व्याख्या]

करोति-आच्छादयति । तमःप्रसरमीप्सति । कौसुम्भं वस्त्रं परिदधाति । धरा स्त्री, मेघभर्तृसङ्गम इति विचेष्टितमत्र भावः ॥ १४३ ॥

[१४४] सलिलद्रहं त्यक्त्वा तरुसिप(शिख)रे वकैरारूढम् । ताण्डवं नृत्यं कृत्वा वरसिप(शिख)रिषु-पर्वतेषु शिखण्डिभिः रटितम् । श(स)लिलेषु शालूरैः पुर(परु)षखरेण स(श)ब्दितम् । कलकण्ठीभिश्चूतशिखरमारुह्य कलकलशब्दः कृतः ॥ १४४ ॥

[१४५] नागैः-सर्पैः फणीन्द्रैः-फणयुक्तैः महाविषैः निबिडं यथा दश[सु]दिक्षु पन्था रुद्धः । मार्गः असञ्चरो जातः । नीरतरङ्गभरेण पडला (पाडल) दलखण्डनं या(जा)तम् । अन्यच्च, हंसैः गिरिसिप(शिख)रे करुणस्वरं यथा रुदितम् ॥ १४५ ॥

[अवचूरिका]

पार्श्वाच्छादयति, सलज्जत्वात्, तारा-आयतनेऽलक्षे करोति-आच्छादयति, तमः प्रसरमीप्सति, कौसुम्भं वस्त्रं परिदधाति । धरा स्त्री, मेघभर्तृसङ्गम इति विचेष्टितमत्र भावः ॥

[१४४] सलिलद्रहं त्यक्त्वा तरुशिखरे बकैरारूढम् । ताण्डवं नृत्यं कृत्वा वरशिखरिषु-पर्वतेषु शिखण्डिभी रटितम् । सलिलेषु सालूरैः पु(प)रुषस्वरेण शब्दितम् । कलकण्ठीभिः-कोकिलाभिश्चूतशिखरमारुह्य कलकलशब्दं(ब्दः) कृतः ॥

[१४५] नागैः फणीन्द्रैश्च दशसु दिक्षु निबिडं यथा पन्था रुद्धः । महाविषैः पानीयैर्मार्गोऽसंचरो जातः । नीरतरङ्गभरेण पाडलदलपरिखण्डनं जातम् । हंसैर्गिरिशिखरे करुणस्वरेण 'उ' इत्यधिकं रुदितम् ॥

मच्छरभय[1] संचडिउ[2] रन्नि[3] गोयंगणिहि,
मणहर[4] रमियइ[5] नाहु रंगि[6] गोयंगणिहि† ।
हरियाउलु[7] धरवलउ कयंबिण[8] महमहिउ,
कियउ भंगु अंगंगि अणंगिण[9] मह अहिउ[10] ॥ १४६ ॥

विसमसिज्जविलुलंतिय[11] अइदुक्खिन्नियइ[12],
अलिउलमाल विणग्गय सर पडिभिन्नियइ[13] ।
अणिमिसनयणुव्विन्निय[14] णिसि जागंतियइ,
वत्थु[15] गाह किउ[16] दोहउ णिद्द[17] अलहंतियइ ॥ १४७ ॥

झंपवि[18] तम वद्दलिण दसह[19] दिसि छायउ अंबरु,
उन्नवियउ[20] घुरहुरइ[21] घोरु घणु किसणाडंबरु ।

1 B °भइ । 2 B संचरिउ । 3 B रंगि । 4 B मणहरु । 5 A रमीयइ । 6 B रंगिचंगि । † पतित एषः पादः C आदर्शे । 7 C हरियालउ । 8 C कयंबिणि । 9 B अणंगिहि । 10 A हियउ । 11 C विललंतय । 12 C दुक्खिन्नियइ; B दाखिन्नियइ । 13 C °भिन्नयइ । 14 A B °नयणोविन्निय । 15 A वत्थ; B वत्थू । 16 C कीह । 17 B निंद । 18 A झंपिवि । 19 A दहहि । 20 A उन्नमियउ । 21 C घुरुहरइ ।

[टिप्पनकरूपा व्याख्या]

[१४६] मच्छर[भ]याद् गवां व्रजै[:] स्थले आरूढम् । गोपाङ्गनाभिर्मधुरं गीतं गीयते । हरिताऽऽकुलं धरावलयं कदम्बेन सुगन्ध(ध्य)ति । अनङ्गेन ममाधिक[:] अङ्गभङ्गः कृतः ॥ १४६ ॥

[१४७] रात्रौ विषमसिज्झा(शय्या)यां मया लुलन्त्या एकाकिन्या निद्रा गमिता। सरोवरे कमलानां मध्ये अलिकुलमाला सङ्कुचिता जाता । मया अनिमिषं रात्रौ जागरणः कृतः । वस्तुक–गाथा–दोधकैर्निद्रामलभन्त्या रात्रिर्निर्गमिता ॥ १४७ ॥

[१४८] भो पथिक ! श्यामवद्दलैः दशदिशिं व्याप्य आकाश आच्छादितः । गगने उन्नवि(मि)तो घुरहुरति घनो मेघः कृष्णाडम्बरः । आकाशमार्गे नभोवल्ली–

[अवचूरिका]

[१४६] मच्छरभयाद् गवां व्रजैः स्थले आरूढम् । गोपाङ्गनाभिर्मधुरं गीतं गीयते । हरिताकुलं धरावलयं कदम्बेन सुगन्धितम् । अनङ्गेन समधिकमङ्गभङ्गः[:] कृतः ॥

[१४७] विषमसह्या (शय्यायां) विलुलन्त्या अतिदुःखाकीर्णया अलिकुलमालाविनिर्गतस्वरप्रतिभिन्नया अनिमिषनयनोद्विग्नया निशि जागर्तं(गृत)या निद्रामलभन्त्या वस्तुको गाथा दोधकश्च कृतः ॥

[१४८] वद्दलेन तमो अत्यर्थं झम्पित्वा–आक्रम्य, दस(श)सु दिक्षु अम्बरमाकाशमाच्छादितम्। घन उन्नमितो घोरं यथा कृष्णाडम्बरं घुरहरति–गर्जति । नभोवल्ली–विद्युत् नभोमार्गे

णहहमग्गि[1] णहवल्लिय[2] तरल[3] तडयडि[4] वि तडक्कइ,
दद्दुररडणु रउद्दु सहु कुवि[5] सहवि ण सक्कइ ।
निवड[6] निरंतर[7] नीरहर[8] दुद्धर धरधारोहभरु ।
किम सहउ[9] पहिय सिहरट्ठियइ[10] दुसहउ[11] कोइल रसइ सरु ॥१४८॥
उल्हवियं गिम्हहवी धारानिवहेण पाउसे[12] पत्ते[13] ।
अच्चरियं मह[14] हियए[15] विरहग्गी तवइ अहिय[य]रो[16] ॥ १४९ ॥
गुणणिहि जलबिंदुब्भवहि[17], ण गलत्थिय लज्जंति ।
पहिय[18] जं थोरंसुइहि[19], थण थड्ढा[20] डज्झंति[21] ॥ १५० ॥

1 A णहहमग्गिहि; C °मग्गिण । 2 A °वल्लि तर° । 3 B तरयल । 4 C तयड वि° । 5 A कुइ; B कि वि । 6 B निविड । 7 C निरंतरु । 8 C नीरु भरु । 9 B सहिउ । 10 C सिहयरट्ठियइ । 11 C दुस्सहु । 12 C पावसो । 13 A C पउसोपत्तो । 14 C मिह । 15 A चित्ते हियए । 16 C अहियरं । 17 A °ब्भविहि; B °ब्भवणु । 18 A पंइय जं थोरं°; B पाइय जं । 19 C °सुयहि । 20 C थण घट्टा । 21 B ज्झंति ।

[टिप्पनकरूपा व्याख्या]

विद्युत् तडतडेति शब्दं करोति। दर्दुराणां रटनं-पूत्कारं श्रुत्वा सह्यं (सोढुं) न शक्यते। भो पथिक ! निविडं च शब्दा[द्] दुर्द्धरं नीरधरं मेघं सिष(शिखर)स्थितेन तेन कथं सहितम् ॥ १४८ ॥

[१४९] मया ग्रीष्मा (ष्मो) ऋतुः निर्गमिता(तः)। मेघसमूहे वर्षाकाले प्राप्ते श(स)ति मह-मम हि(ह्द)दये एतदाश्चर्यं तथापि अधिकतरा(रो) विरहाग्निस्तपति ॥ १४९ ॥

[१५०] गुणयुक्ता जलबिन्दूद्भवा मुक्ताहाराः किं न लज्जन्ति(न्ते)। यत् पथिक ! स्तनौ स्थूलाश्रुभिर्दह्येते, परं न लज्जतः। यत[:] स्तब्धौ। स्तब्धानां कष्टेऽपि सज्जनानां दुःखं लज्जा च न भवति ॥ १५० ॥

[अवचूरिका]

तरलं यथा तडत्कारं कृत्वा-तडत्करोति। दर्दुराणां रटनं रौद्रं शब्दं कोऽपि सोढुं न शक्नोति। निबिडं निरन्तरं नीरधरं मेघं दुर्धरधारौघभरं हे पथिक ! कथं सहामि ?। अन्यच्च, शिखरस्थिता आम्रोपरिस्था कोकिला दुःसहं स्वरं रसति ॥

[१४९] हे पथिक ! ग्रीष्महविः पाउसे-वर्षाकाले प्राप्ते सति धारानिवहेन मेघधारासमूहेन व्यापितम्। परं मम हृदय एतदाश्चर्यं विरहाग्निरधिकतरस्तपति ॥

[१५०] गुणयुक्ता जलबिन्दूद्भवा मुक्ताहारा[:] किं न लज्जन्ते?। यत् पथिक ! स्तनौ स्थूलाश्रुभिर्दह्येते , परं न लज्जतः। यतः स्तब्धौ। स्तब्धानां कष्टेऽपि सज्जनानां दुःखं लज्जा च न भवति ॥

दोहउ एउ पढेविणु विरहखेआलसीइ[1],
उ अग्गइ[2] अइखिन्नी[3] मोहपरावसीइ[4] ।
सुविणंतरि चिरु[5] पवसिउ[6] जं[7] जोइअउ[8] पिउ,
संजाणिवि[9] कर गहिवि[10] मइ[11] भणिउ[12] इहु[13] ॥ १५१ ॥

किं जुत्तं[14] सुकुलग्गयाण[15] मुत्तूण जं च[16] इह समए ।
तडतडणतिव्व-घणघडणसंकुले दइय[17] वच्चंति ॥ १५२ ॥

णवमेहमालमालिय णहम्मि सुरचाव[18] रत्तदिसि[19]पसरो ।
घणछन्नछम्म इंदोइएहि[20] पिय[21] पावसं दुसहं ॥ १५३ ॥

*

1 B विरहिखिआ° । 2 C आगइ । 3 B °खिन्निय । 4 B C °वसी । 5 C चिर । 6 C पविसियउ । 7 B नास्ति 'जं'; C ज । 8 C जोइउ । 9 A सिंजाणवि; B सिजाणिवि । 10 A B °गहवि । 11 A ताम मइ । 12 C भणियउ । 13 B इउ । 14 B C उत्तं । 15 C सुकलग्ग°; B कुलग्ग° । 16 B चि । 17 B C दईय । 18 A सुरचाय; B सुरचाइ । 19 A दिस° । 20 C °च्छम्मइदेवएहि । 21 A पिउ पाउसं ।

[टिप्पनकरूपा व्याख्या]

[१५१] एतद्दोधकं पठित्वा, विरहाऽऽकुला जाता । एवम्–अमुना प्रकारेण, मोहपरवशा सती चिरं प्रस्थितो भर्त्ता मया स्वप्ने दृष्टः । इति वचनं कथि(थयि)त्वा करग्रहणपूर्व्वकं एवं पथिको भणितः–एवं ज्ञात्वा करे गृहीतः । सतीत्वमिति सूचितम् ॥ १५१ ॥

[१५२] हे दयित ! किं सुकुलोद्गतानां इदं युक्तम्, यत् तडतडणतीव्रायां विद्युति घनघटनमेघशब्दसंकुले ई[द]शे [स]मये दयितां मुक्त्वा व्रजन्ति ॥ १५२ ॥

[१५३] हे प्रिय ! प्रावृट्–वर्षाकालो दुस्सहः । कैः ? मेघमाला–सुरचापेन्द्र-गोपकैः, आरक्तदशदिग्प्रसारैः–इत्यादि मेघालङ्कारैः ॥ १५३ ॥

[अवचूरिका]

[१५१] एतद्दोधकं पठित्वा विरहखेदालसयाऽतिखिन्नया मोहपरवशया स्वप्नान्तरे चिरप्रवि-स(वसि)तः प्रियो दृष्टः । उपलक्ष्य, करे गृहीत्वा, मया एवं भणितः ॥

[१५२] हे दयित ! किं कुलोद्भवानामिदं युक्तम्, यत्तडतडणनीव्रायां विद्युति, घनघटनमेघ-शब्दसंकुले ईदृशे समए(ये) दयितां मुक्त्वा व्रजन्ति । तन्न युक्तम् ॥

[१५३] हे प्रिय ! प्रावृड् दुःसहः । कैर्नवमेघमाला-सुरचापेन्द्रगोपकैः । किंविशिष्टैस्तैः ?–दिक्षु प्रसृतैः । पुनः कैः ?–घनच्छन्नच्छद्मेन्दुभिः ॥

[1]रायरुद्ध[2]कंठग्गि विउद्धी[3] जं सिवणि[4],
कह हउं कह पिउ[5] पत्थरंगि[6] जं न मुइय[7] खणि ।
जइ[8] णहु[9] णिग्गउ जीउ[10] पावबंधिहि जडिउ,
हियउ न किण[11] किरि[12] फुट्टउ णं वज्जिहि घडिउ ॥ १५४
ईसरसरि साल्लूरिव[13] कुणंती करुणसरि ।
इहु दोहउ मइ पढियउ[14] निसह[15] पच्छिमपहरि ॥ १५५ ॥
जामिणि जं वयणिज्ज[16] तुअ, तं तिहुयणि णहु माइ[17] ।
दुक्खिहि होइ चउग्गणी, झिज्जइ[18] सुहसंगाइ[19] ॥ १५६ ॥

1 B रज्ज° । 2 A °रुद्ध । 3 C विबुद्धी । 4 A सयणि; C सिविणि । 5 C पिय । 6 C पत्थरग्गि । 7 C मुई । 8 C जं । 9 A णं । 10 C जीवु । 11 A किणि । 12 A किर; C करि । 13 A B सालूर । 14 A पत्थिउ; B पढिउ । 15 C णिसि । 16 B वयणुज्जु; C वयणज्ज । 17 B माइं । 18 C झिज्जउ । 19 B C °संगाइं ।

[टिप्पनकरूपा व्याख्या]

[१५४] रागरुद्धकण्ठाग्रा स्वप्ने प्रबुद्ध्य यदा पश्यामि, क्व अहम्, क्व प्रियः ? तज्ज्ञात्वा यन्न मृता तन्मन्ये प्रस्तराङ्गी । यज्जीवो न निर्गतस्तन्मन्ये पापजटितः । यच्च हि(हृ)दयं [न]स्फुटितं तन्मन्ये वज्रघटितम् ॥ १५४ ॥

[१५५] ईषत् स्वरेण शालूरवत् करुणं स्वरं कुर्वती(न्त्या) एष दोधको मया पठितः, रात्रौ शेषविभागे ॥ १५५ ॥

[१५६] हे यामिनि ! यत् तव वचनीयं तत् त्रिभुवनेऽपि न माति । एषा रजनी दुरिक(ःखिता)नां चतुर्गुणी भवति । सुखसङ्गमे तत् क्षणा[द्] व्रजति ॥ १५६ ॥ ॥ वर्णावर्णनं समाप्तम् ॥

[अवचूरिका]

[१५४] रागरुद्धकण्ठाग्रा स्वप्ने प्रबुध्य यदाऽहं पश्यामि, क्व अहम्, क्व प्रियः? तं(तद्) ज्ञात्वा यन्न मृता, तन्मन्ये प्रस्तराङ्गी । यज्जीवो न निर्गतस्तन्मन्ये पापजटितः । यच्च हृदयं न स्फुटितं तन्मन्ये वज्रघटितम् ॥

[१५५] ईषत् स्वरेण शालूरवद्-मण्डूकवत् करुणस्वरं कुर्वन्त्या निशः पश्चिमप्रहरे एष दोधको मया पठितः ॥

[१५६] हे यामिनि ! यत् तव वचनीयं तत् त्रिभुवनेऽपि न माति । दुःखे चतुर्गुणा भवसि । सुखे [क्षणात्] त्वं क्षीयसे ॥ वर्णावर्णनं समाप्तम् ॥

[अथ शरद्वर्णनम् ।]

इम[1] विलवंती[2] कहव दिण[3] पाइउ,
गेउ[4] गिरंत पढंतह पाइउ ।
पियअणुराइ[5] रयणिअ[6] रमणीयव[7],
गिज्जइ[8] पहिय मुणिय[9] अरमणीयव ॥ १५७ ॥

जामिणि[10] गमियइ इम जग्गंतह[11],
पहिय पियागमि[12] अस[13] तगंतह[14] ।
गोसुयरंत[15] मिल्हि सिज्जासणु,
मणि सुमरंत[16] विरहणिन्नासणु ॥ १५८ ॥

दक्खिण[17] मग्गु णियंतह भत्तिहिं,
दिट्ठु [18]अइत्थिरिसिउ[19] मइ झत्तिहिं[20] ।
मुणियउ[21] सु[22] पाउसु परिगमिअउ,
पिउ[23] परएसि रहिउ णहु[24] रमिअउ ॥ १५९ ॥

1 A इव । 2 B विलवत; C विलंवंत । 3 B दिणु । 4 B गेय । 5 A °अणुराइय । 6 C रयणि । 7 A रमणिइव । 8 C मुणिय° । 9 C गीयइ । 10 B जामिणी । 11 B जागंतहं । 12 C पियागम । 13 A अइस । 14 B तगंतहं । 15 C गोसयरंत । 16 A °सुयरंत । 17 B C दक्षिण° । 18 C अगत्थि° । 19 B रिसी । 20 C चित्तिहि । 21 A मुणिणु; C मुणी । 22 B 'सु' नास्ति । 23 B नास्ति 'पिउ' । 24 C नह ।

[टिप्पनकरूपा व्याख्या]

[१५७] अथ शरद्वर्णनम्–एवं विलपन्त्या गीतं रागेण गायन्त्या, प्राकृतं पठन्त्या, वर्षाप्रान्तदिनं समाप्तम् । यस्मिन् रजनी रमणीकैव गीयते, सा रजनी मया(मम) अरमणिरिव–करपत्रकमिव जाता ॥ १५७ ॥

[१५८] एवं प्रियागमास(श)या जीवन्त्या गोसे=प्रभाते शय्यासनं मुक्त्वा विरहनाशनं प्रियं स्मरन्त्या जाग्रन्त्या(त्या) रात्रिर्गमिता ॥ १५८ ॥

[१५९] पत्याश्रितत्वा[द्] दक्षिणमार्गं भक्त्या पश्यन्त्या अगस्तिमहर्षिर्दृष्टः । वर्षाकालं पर(रि)गमितं ज्ञात्वा भर्त्ता परदेशे स्थितः, परं न रमितः ॥ १५९ ॥

[अवचूरिका]

[१५७] अथ शरद्–एवं विलव(प)न्त्या गीतं रागेण गायन्त्या, प्राकृतं पठन्त्या, वर्षाप्रान्तदिनं प्राप्तम् । यस्मिन् रजनी रमणीकैव गीयते, सा रजनी मया अरमणिरिव–करपत्रमिव जाता ॥

[१५८] एवं प्रियागमाशया जीवन्त्या गोसे=प्रभाते शय्यासनं मुक्त्वा विरहनाशनं प्रियं स्मरन्त्या जाग्रत्या रात्रिर्निर्गमिता ॥

[१५९] पत्याश्रितत्वाद् दक्षिणमार्गं भक्त्या पश्यन्त्या अगस्तिमहर्षिर्झटिति=शीघ्रं दृष्टः । ज्ञातं वर्षा परिगमिता । परदेशे स्थितः प्रियः स न रमितः ॥

गय विद्दरवि[1] वलाहय गयणिहि,
मणहर रिक्ख पलोइय[2] रयणिहि ।
हुयउ वासु[3] छम्मयलि[4] फणिंदह,
फुरिय[5] जुन्ह निसि निम्मलचंदह ॥ १६० ॥
सोहइ सलिलु[6] सरिहिं[7] सयवत्तिहि,
विविहतरंग तरंगिणि जंतिहि ।
जं हय हीय गिंभि[8]णवसरयह,
तं पुण सोह चडी णव सरयह ॥ १६१ ॥
हंसिहि कंदुट्टिहि[9] घुट्टिवि रसु,
कियउ[10] कलयलु सुमणोहरु सुरसु ।
उच्छलि भुवण[11] भरिय सयवत्तिहिँ,
गय जलरिछि[12] पडिछिय तित्थिहिँ ॥ १६२ ॥

1 A विङ्गरवि; C विध्युरवि । 2 A पइलोइय । 3 C वास । 4 C छम्मयल । 5 C फुरिऊ जुन्हु । 6 C सलिल । 7 B सरहिं । 8 B गंभिन; C गिम्हिण । 9 A कंदुट्टहि; C कुटिट्ठिहि । 10 A किउ । 11 C भुवणि । 12 A रिछ ।

[टिप्पनकरूपा व्याख्या]

[१६०] बलाहका गम(ग)नाद् विदीर्य गता । रजन्यां मनोहराणि ऋक्षाणि प्रलोकितानि । फणीन्द्राणां पाताले वासो या(जा)तः । चन्द्रस्य ज्योत्स्ना निर्मला जाता ॥ १६० ॥

[१६१] शतपत्रैः सरोवरेषु शसि(सलि)लानि शोभन्ते । तरङ्गिणीषु गच्छन्तस्तरङ्गा[ः] शोभन्ते । या च नवसरसां ग्रीष्मेण सो(शो)भा हृता सा शरदि चटिता ॥ १६१ ॥

[१६२] हंसैः कमलकन्दोत्कण्ठितैः तेषां रसं पीत्वा मनोहरः कलकलः कृतः । स(श)तपत्रैः भुवनं भृतम् । जलप्रवाहस्तीर्थे स्वस्थाने पतितः ॥ १६२ ॥

[अवचूरिका]

[१६०] बलाहका गगना[द्] विदीर्य गताः । रजन्यां मनोहारीणि ऋक्षाणि प्रलोकितानि । फणीन्द्राणां पाताले वासो जातः । चन्द्रस्य ज्योत्स्ना निर्मला स्फुरिता ॥

[१६१] शतपत्रैः सरोवरेषु सलिलानि शोभन्ते । तरङ्गिणीषु गच्छन्तस्तरङ्गाः शोभन्ते । नवसरसां ग्रीष्मेण शोभा हृता सा शरदि चटिता ॥

[१६२] हंसैः कमलकन्दोत्कण्ठितैस्तेषां रसं पीत्वा मनोहरकलकलः कृतः । शतपत्रैर्भुवनं भृतम् । जलप्रवाहस्तीर्थे स्वस्थाने पतितः ॥

धवलिय[1] धवलसंखसंकासिहिं[2],
सोहहि सरह तीर[3] संकासिहि[4] ।
णिम्मलणीरसरिहिं पवहंतिहिँ,
तड रेहंति[5] विहंगमपंतिहिँ ॥ १६३ ॥
पडिबिंबउ[6] दरसिज्जइ[7] विमलिहिं,
[8]कद्दमभारु पमुक्किउ[9] सलिलिहिं ।
सहमि ण कुंजसद्दु[10] सरयागमि,
मरमि मरालागमि[11] णहु तग्गमि[12] ॥ १६४ ॥
झिज्झउ पहिय जलिहि झिज्झंतिहि,
खिज्जउ खज्जोयहिं[13] खज्जंतिहि ।
सारस [14]सरसु रसहिँ किं सारसि,
मह[15] चिर जिण्णदुक्खु[16] किं सारसि ॥ १६५ ॥

1 A पडिलेय । 2 A °संकासइ । 3 C तीरि; B वीरु । 4 B संकासइं । 5 C रेहं विहगं पंतिहि । 6 C पडबिंब° । 7 B दरिसिज्जइ । 8 B कद्दमु° । 9 C पमुक्कउ । 10 A °सद् । 11 B मुरालागमि । 12 B तग्गागमि । 13 A खज्जोइहिं । 14 C सारसरसु; B सारसु फरसु । 15 A मइ; B मम । 16 C °दुक्ख; B दुक्खुं जिन्न ।

[टिप्पनकरूपा व्याख्या]

[१६३] धवलितसंष(शंख)सङ्काशैः सरसां तटाः शोभन्ते । निर्म्मलनीरसरसां तटा विहङ्गमपङ्क्तिभिरुपविशद्भिः शोभन्ते ॥ १६३ ॥

[१६४] प्रतिबिम्बोदयो निर्मलो दृश्यते । सलिलैः पानीयैः कर्दमभारः प्रमुकितः (मुक्तः)। शरदागमे कुञ्जानां पक्षिणां शब्दो न श्रूयते । तस्यागमे कमलमृणाला अपि गताः ॥ १६४ ॥

[१६५] सारसाः सरसं रसन्ति । तदा मयोक्तम्–हे सारसि ! मम चिरजीर्णदुःखं किं स्मारयसि ? केषु सत्सु, जलेषु क्षयत्सु खद्योतेषु द्योतत्सु ॥ १६५ ॥

[अवचूरिका]

[१६३] धवलितधवलशङ्कसंकाशैः सदृक्षैः सत्काशैः सरसां तटाः शोभन्ते । निर्मलनीरसरसां तटा विहङ्गमपङ्क्तिभिः प्रविशद्भिः शोभन्ते ॥

[१६४] सलिलैर्विमलैः प्रतिबिम्बं दृश्यते । कर्दमभारश्च मुक्तः । क्रौञ्चशब्दं न सहामि । मरालीगमेऽगमे च मरामि ॥

[१६५] सारसाः सरसं रसन्ति । तदा मयोक्तं–हे सारसि ! मम जीर्णदुःखं किं स्मारयसि ? । केषु सत्सु !–जलेषु क्षयत्सु सत्सु, खद्योतेषु द्योतत्सु ॥

णिट्ठुर करुणु[1] सद्दु मणमहि[2] लव,
दड्ढा[3] महिल होइ गयमहिलव ।
इम इक्किक्कह[4] करुण भणंतह,
पहिय ण[5] कुइ धीरवइ खणंतह[6] ॥ १६६ ॥
अच्छिहि[7] जिह सन्निह[8] घर[9] कंतय[10],
रच्छिहि[11] रमिहि[12] ति रासु रमंतय[13] ।
करिवि[14] सिंगारु विविह आहरणिहिं[15],
चित्तविचित्तइ तणुपंगुरणिहिं[16] ॥ १६७ ॥
तिलउ[17] भालयलि तुरक्कि[18] तिलक्किवि,
कुंकुमि चंदणि तणु चच्चंकिवि ।
सोरंडहिं[19] [20]करि लियहि फिरंतिहिं[21],
दिव्वमणोहरु गेउ गिरंतिहिं[22] ॥ १६८ ॥

---

1 A कसणु । 2 C मह न महिं लवु । 3 A दडा; C दट्ठ । 4 B इक्कक्कह, C इक्कंकह । 5 A णु । 6 B कुणंतहं । 7 B अच्छिइ; C अच्छय । 8 A सन्निहि; C सन्नय । 9 C घरि । 10 A कंतइ । 11 A रच्छइ । 12 A रमहि । 13 A भमंतय । 14 A करवि । 15 A आहरणहि । 16 A पंगुरणहि; B पंगुरणइ । 17 A तिलु । 18 C तुरिक्कि । 19 A सोरंडिहि; C सोरंडह । 20 B किरि । 21 B फिरंतहि । 22 B गिरंतहि ।

[टिप्पनकरूपा व्याख्या]

[१६६] हे सारसि ! निष्ठुरं करुणशब्दं मनोमध्ये लव । विरहार्त्ता स्त्री तव शब्देन गतमहोल(त्स)वा भवन्ति(ति) । एवं एकं एकं प्रति करुणशब्दं भणन्त्या, तथापि कोऽपि न धीरयति ॥ १६६ ॥

[१६७] यासां स्त्रीणां संनिधौ गृहे कान्ताः सन्ति, रथ्यासु रासं रमन्त्यस्ताः रमन्ति । विविधनानाप्रकारैः सि(शृ)ङ्गारं कृत्वा रमन्ति । कैः चित्रविचित्रशरीरप्रावरणैः ॥ १६७ ॥

[अवचूरिका]

[१६६] हे सारसि ! निष्ठुरं करुणशब्दं मनोमध्ये लव । विरहार्त्ता स्त्री तव शब्देन गतमहोत्सवा भवति । एवमेकमेकं प्रति करुणशब्दं भणन्त्या, तथापि को न धीरयति ॥

[१६७] यासां स्त्रीणां सन्निधौ गृहे कान्ताः सन्ति, ता रथ्यासु रासं रमन्त्यो भ्रमन्ति । विविधाभरणैः शृङ्गारं कृत्वा, चित्रविचित्रैस्तनुपङ्गुरणैर्वस्त्रैश्च ॥

